श्रीमते रामानुजाय नमः

# ॥ श्री वेङ्कटेश मङ्गलाशासनम्॥

* श्रियः कान्ताय कल्याण निधये निधयेऽर्थिनाम्।
श्रीवेङ्कट निवासाय श्रीनिवासाय मङ्गलम्॥ १

लक्ष्मी सविभ्रमालोक सुभ्रूविभ्रम चक्षुषे।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम्॥ २

श्रीवेङ्कटाद्रि शृङ्गाग्र मङ्गलाभरणाङ्घ्रये।
मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम्॥ ३

सर्वावयव सौन्दर्य संपदा सर्वचेतसाम्।
सदा संमोहनायास्तु वेङ्कटेशाय मङ्गलम्॥ ४

नित्याय निरवद्याय सत्यानन्दचिदात्मने।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गलम्॥ ५

स्वतस्सर्वविदे सर्व शक्तये सर्वशेषिणे।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम्॥ ६

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने।
प्रयुञ्जे परतत्वाय वेङ्कटेशाय मङ्गलम्॥ ७

आकाल तत्वमश्रान्तं आत्मनां अनुपश्यताम्।
अतृप्त्य अंमृत रूपाय वेङ्कटेशाय मङ्गलम्॥ ८

श्रीमते रामानुजाय नमः

प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना।
कृपयाऽऽदिशते श्रीमद्वेङ्कटेशाय मङ्गलम्॥ ९

दयामृत तरङ्गिण्यास् तरङ्गैरिव शीतलैः।
अपाङ्गै सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम्॥ १०

स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये।
सर्वार्ति समनायास्तु वेङ्कटेशाय मङ्गलम्॥ ११

* श्रीवैकुण्ठ विरक्ताय स्वामि पुष्करिणी तटे।
रमया रममाणाय वेङ्कटेशाय मङ्गलम्॥ १२

* श्रीमत् सुन्दर जामातृ मुनि मानस वासिने।
सर्वलोक निवासाय श्रीनिवासाय मङ्गलम्॥ १३

* मङ्गलाशासनपरैर्मदाचार्य पुरोगमैः।
सर्वैश्च पूर्वैराचार्यैर्सत्कृतायास्तु मङ्गलम्॥ १४

**॥ इति श्री वेङ्कटेश मङ्गलाशासनं संपूर्णम्॥**